শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৰেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২৯

*দেৱানামমৃতোপলব্ধিপ্রকারৱর্ণনম্*

উদগচ্ছতস্তৱ করাদমৃতং হরতসু
দৈত্যেষু তানশরণাননুনীয দেৱান্।
সদ্যস্তিরোদধিথ দেৱ ভৱতপ্রভাৱা-
দুদ্যতস্ৱযূথ্যকলহা দিতিজা বভূৱুঃ॥ ১॥

শ্যামাং রুচাপি ৱযসাপি তনুং তদানীং
প্রাপ্তোসি তুঙগকুচমণ্ডলভঙগুরাং ত্ৱম্।
পীযূষকুম্ভকলহং পরিমুচ্য সর্ৱে
তৃষ্ণাকুলাঃ প্রতিযযুস্তৱদুরোজকুম্ভে॥ ২॥

কা ত্ৱং মৃগাক্ষি ৱিভজস্ৱ সুধামিমামি-
ত্যারূঢরাগৱিৱশানভিযাচতোমূন্।
ৱিশ্ৱস্যতে মযি কথং কুলটাস্মি দৈত্যা
ইত্যালপন্নপি সুৱিশ্ৱসিতানতানীঃ॥ ৩॥

মোদাত্ সুধাকলশমেষু দদতসু সা ত্ৱং
দুশ্চেষ্টিতং মম সহধ্ৱমিতি ব্রুৱাণা।
পঙক্তিপ্রভেদৱিনিৱেশিতদেৱদৈত্যা
লীলাৱিলাসগতিভিঃ সমদাঃ সুধাং তাম্॥ ৪॥

অস্মাস্ৱিযং প্রণযিনীত্যসুরেষু তেষু
জোষং স্থিতেষৱথ সমাপ্য সুধাং সুরেষু।
ত্ৱং ভক্তলোকৱশগো নিজরূপমেত্য
স্ৱর্ভানুমর্ধপরিপীতসুধং ৱ্যলাৱীঃ॥ ৫॥

www.prapatti.com

ত্বত্তঃ সুধাহরণযোগ্যফলং পরেষু
দত্বা গতে ত্বযি সুরৈঃ খলু তে ৱ্যগৃহ্নন্।
ঘোরেথ মূর্ছতি রণে বলিদৈত্যমাযা-
ৱ্যামোহিতে সুরগণে ত্বমিহাৱিরাসীঃ॥ ৬ ॥

ত্বং কালনেমিমথ মালিমুখাঞ্জঘন্থ
শক্রো জঘান বলিজম্ভৱলান্ সপাকান্।
শুষ্কার্দ্রদুষ্করৱধে নমুচৌ চ লূনে
ফেনেন নারদগিরা ন্যরুণো রণং ত্বম্॥ ৭ ॥

যোষাৱপুর্দনুজমোহনমাহিতং তে
শ্রুত্বা ৱিলোকনকুতূহলৱান্ মহেশঃ।
ভূতৈসসমং গিরিজযা চ গতঃ পদং তে
স্তুত্বাব্রৱীদভিমতং ত্বমথো তিরোধাঃ॥ ৮ ॥

আরামসীমনি চ কন্দুকঘাতলীলা-
লোলাযমাননযনাং কমনীং মনোজ্ঞাম্।
ত্বামেষ ৱীক্ষ্য ৱিগলদ্ৱসনাং মনোভূ-
ৱেগাদনঙগরিপুরঙগ সমালিলিঙগ॥ ৯ ॥

ভূযোপি ৱিদ্রুতৱতীমুপধাৱ্য দেৱো
ৱীর্যপ্রমোক্ষৱিকসতপরমার্থবোধঃ।
ত্বন্মানিতস্তৱ মহত্ত্বমুৱাচ দেৱ্যৈ
তত্তাদৃশস্তৱমৱ ৱাতনিকেতনাথ॥ ১০ ॥

**********